# प्रतिबन्धकः

## सौमित्र आचार्यः

पलाशपुरनामधेयः कश्चित् ग्रामः। तत्र पुष्करिण्यां बहुषु पुष्पेषु पद्मपुष्पमिव रमेशः सर्वेषां प्रियः आसीत्। सः अतीव मेधावी आसीत्। यदा स दशवर्षदेश्यस्तदा तस्य पिता दिवं गतः। गृहे तस्य एका भगिनी माता च। दारिद्र्यकारणात् तासां जीवनं बहु कष्टेन चलदासीत्। पितृवियोगात् अर्थाभावेन पीडितः सन् स विद्यालयं गन्तुकामोऽपि असमर्थः अभवत्। परन्तु विद्यालयस्य प्रधानशिक्षकः तस्मै अतीव स्निह्यति स्म। तस्यैव अर्थसाहाय्येन रमेशः विद्यालये पाठं समापितवान्। तत उन्नतविद्यालयः गन्तव्यः। अर्थो हि लोके पुरुषस्य बन्धुः परन्तु तत्रापि स एव अर्थाभावः तम् अध्ययनाद् बाधते स्म। तस्मात् स कानिचिद्दिनानि विद्यालयं गत्वापि पुनर्न गतवान्। एवं कतिषुचिदेव दिनेषु तस्य प्रतिभा विद्यालये विश्रुता अभवत्। तस्य प्रतिभां वीक्ष्य विद्यालयस्य काचित् शिक्षिका तस्मिन् पुत्रवत् स्निहितुमारब्धवती। तस्य पठनाय सा धनसाहाय्यमपि कृतवती। रमेशः पुनः पठनमारब्धवान्। प्रतिभाबाहुल्यात् सर्वस्मिन् विषये स प्रथमस्थानमेवाधिकरोति स्म। एवमध्ययनेन उन्नतविद्यालये बहु मानमपि तेन अर्जितम्।

उन्नतविद्यालये पठनं समाप्य महाविद्यालयेऽपि संस्कृतविषयमाधारीकृत्य तस्या एव शिक्षिकाया अर्थसाहाय्येन स पठनं समापितवान्। एवमेव विश्वविद्यालयेऽपि सः अध्ययनं सम्पादितवान्। तदनन्तरं स चिन्तितवान् यत् प्रथमं जीविका लब्धव्या। तेन मातृसमशिक्षिकायै सर्वं स्वीकृतं धनं प्रत्यर्पणीयम्। पुनः यथा तत्सदृशा ये छात्रा धनाभावेन पठने क्लेशमनुभवन्ति तेषामध्ययने यथा क्लेशो न स्यात् तदर्थम् अर्थस्य विद्याया च दानमपि करिष्यति इत्येवं विचिन्त्य जीविकाप्राप्तये बहु श्रमं विहितवान्। ततः नेपाले काठमाण्डुनगरस्य एकस्मिन् विद्यालये जीविकामपि प्राप्तवान्।

तदा एप्रिलमासस्य पञ्चविंशतितमः दिनाङ्कः। शनिवासरः। तस्मिन् दिने प्रातः महता आनन्देन विद्यालयं प्रविष्टवान् आशावान् रमेशः। परन्तु आशा तस्य निराशा जाता प्रथमदिवसे एव, यदा सप्तपञ्चाशन्निमेषाधिकैकादशवादनं तदा नेपालस्योपरि भगवतः रोषाग्निः वर्षितः। आकस्मिककम्पनेन भीताः सन्तः सर्वे जनाः स्वप्राणान् रक्षितुं स्वगृहं त्यक्त्वा इतस्ततः धावनमारब्धवन्तः। रमेशः प्रथमं चिन्तितवान् कम्पनं प्रबलं न भविष्यति। परन्तु कम्पनं कालेन प्रबलतां प्राप्नोति स्म। अयं भूकम्पः अवश्यमेव सर्वं नाशयिष्यति इति निश्चित्य सोऽपि स्वप्राणान् रक्षितुं शीघ्रं विद्यालयात् बहिर्गन्तुं प्रयत्नं कृतवान्। परन्तु भगवतः कोपः मन्ये तस्यैव उपरि आसीत्। विद्यालयाद् बहिर्गमनकाले एकः भग्नप्रस्तरखण्डः अकस्मादेव तस्य मस्तकस्योपरि पतितः। रक्तधारया तस्य समग्रं शरीरं सिक्तं जातम्। कोऽपि अवश्यमेव साहाय्यं करिष्यति इति धिया रक्ताक्तोऽपि स बहिरागन्तुं प्रयत्नं कृतवान्। केचन जनास्तं चिकित्सालयमपि प्रेषितवन्तः। परन्तु तत्र चिकित्सकाः अपि भूकम्पेन आक्रान्ताः। ते स्वविषये एव चिन्तामग्नाः आसन्। पुनः देशस्य रक्षकाः जनान् उद्धर्तुं समागताः। एनं दृष्ट्वा पुनरुज्जीवनं शक्यमिति धिया अन्यत्र प्रेषितः। परन्तु दैवे दुर्जनतां गते तृणमपि प्रायेण वज्रायते। अतः बहु प्रयत्नेनापि अन्तिमः प्राणवायुः तस्य शरीरात् निर्गतः। तेन सह तस्य आशा अपि मृता। भगवति रुष्टे सति न केनापि किमपि कर्तुं शक्यते, नापि धनेन नापि जनेन च।

गृहे माता स्वपुत्रं रमेशं प्रति आशां कृतवती तस्य साहाय्येनैव तस्य भगिनी परिणीता स्यात्। सा न ज्ञातवती यत् तस्या आशा स्वपुत्रमरणेन निराशतां गमिष्यति। अनन्तरं स्वपुत्रस्य शवं निश्चित्य नयन्तु इति वार्ता आगता। तदा सा प्रथमम् अविश्वस्ता अपि स्वपुत्रदर्शनेन विश्वस्ता जाता। इदानीं कथं स्वजीवनं स्वकन्यायाश्च विवाहो भविता इति विचिन्त्य विचिन्त्य भिक्षामार्गेण सम्पाद्यमिति निश्चित्य स्थिता। ततः परस्मिन् दिने प्रातः रमेशस्य विद्यालयस्य शिक्षिका आगता। आगत्य सूचितं तस्य पुत्रः मृतोऽपि अमृत इव जातः। तदा तस्य मात्रा कथमिति पृष्टे तया उक्तं, "रमेशः स्वभविष्यज्जीवनं विचिन्त्य एकां योगक्षेमनिधिं कृतवान् आसीत्। इदानीं तस्य दुर्घटनायां मृत्युकारणात् ततः पञ्चलक्षरूप्यकमितं धनं तत्परिवाराय प्रदास्यते। तेन स मृतो भूत्वाऽपि स्वपरिवाराय कार्यं करोति।" एतच्छ्रुत्वा तस्य माता रमेशस्य मातृत्वं धन्यममन्यत। ततः तत्पत्रमन्विष्य तच्च दर्शयित्वा धनम् आनयत्। तेन भगिन्याः विवाहः स्वमातृजीवनं च सम्यक् जातम्। तस्मादुच्यते उदारचरितानां तु वसुधैव कुटुम्बकम्।